श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ दशमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ दशमः सर्गः ॥

## रावणादीनां तपो वरप्राप्तिश्च

अथाब्रवीन्मुनिं रामः कथं ते भ्रातरो वने।
कीदृशं तु तदा ब्रह्मंस्तपस्तेपुर्महाबलाः ॥ **7.10.1** ॥

अगस्त्यस्त्वब्रवीत् तत्र रामं सुप्रीतमानसम्।
तांस्तान् धर्मविधींस्तत्र भ्रातरस्ते समाविशन् ॥ **7.10.2** ॥

कुम्भकर्णस्ततो यत्तो नित्यं धर्मपथे स्थितः।
तताप ग्रीष्मकाले तु पञ्चाग्नीन् परितः स्थितः ॥ **7.10.3** ॥

मेघाम्बुसिक्तो वर्षासु वीरासनमसेवत।
नित्यं च शिशिरे काले जलमध्यप्रतिश्रयः ॥ **7.10.4** ॥

एवं वर्षसहस्राणि दश तस्यापचक्रमुः।
धर्मे प्रयतमानस्य सत्पथे निष्ठितस्य च ॥ **7.10.5** ॥

विभीषणस्तु धर्मात्मा नित्यं धर्मपरः शुचिः।
पञ्चवर्षसहस्राणि पादेनैकेन तस्थिवान् ॥ **7.10.6** ॥

समाप्ते नियमे तस्य ननृतुश्चाप्सरोगणाः।
पपात पुष्पवर्षं च तुष्टुवुश्चापि देवताः ॥ **7.10.7** ॥

पञ्चवर्षसहस्राणि सूर्यं चैवान्ववर्तत।
तस्थौ चोर्ध्वशिरोबाहुः स्वाध्याये धृतमानसः॥ **7.10.8** ॥

एवं विभीषणस्यापि स्वर्गस्थस्येव नन्दने।
दशवर्षसहस्राणि गतानि नियतात्मनः॥ **7.10.9** ॥

दशवर्षसहस्रं तु निराहारो दशाननः।
पूर्णे वर्षसहस्रे तु शिरश्चाग्नौ जुहाव सः॥ **7.10.10** ॥

एवं वर्षसहस्राणि नव तस्यातिचक्रमुः।
शिरांसि नव चाप्यस्य प्रविष्टानि हुताशनम्॥ **7.10.11** ॥

अथ वर्षसहस्रे तु दशमे दशमं शिरः।
छेत्तुकामे दशग्रीवे प्राप्तस्तत्र पितामहः॥ **7.10.12** ॥

पितामहस्तु सुप्रीतः सार्धं देवैरुपस्थितः।
तव तावद् दशग्रीव प्रीतोऽस्मीत्यभ्यभाषत॥ **7.10.13** ॥

शीघ्रं वरय धर्मज्ञ वरो यस्तेऽभिकाङ्क्षितः।
कं ते कामं करोम्यद्य न वृथा ते परिश्रमः॥ **7.10.14** ॥

अथाब्रवीद् दशग्रीवः प्रहृष्टेनान्तरात्मना।
प्रणम्य शिरसा देवं हर्षगद्गदया गिरा॥ **7.10.15** ॥

भगवन् प्राणिनां नित्यं नान्यत्र मरणाद् भयम्।
नास्ति मृत्युसमः शत्रुरमरत्वमहं वृणे॥ **7.10.16** ॥

एवमुक्तस्तदा ब्रह्मा दशग्रीवमुवाच ह।
नास्ति सर्वामरत्वं ते वरमन्यं वृणीष्व मे॥ **7.10.17** ॥

एवमुक्ते तदा राम ब्रह्मणा लोककर्तृणा।
दशग्रीव उवाचेदं कृताञ्जलिरथाग्रतः॥ **7.10.18** ॥

सुपर्णनागयक्षाणां दैत्यदानवरक्षसाम्।
अवध्योऽहं प्रजाध्यक्ष देवतानां च शाश्वत॥ **7.10.19** ॥

नहि चिन्ता ममान्येषु प्राणिष्वमरपूजित।
तृणभूता हि ते मन्ये प्राणिनो मानुषादयः॥ **7.10.20** ॥

एवमुक्तस्तु धर्मात्मा दशग्रीवेण रक्षसा।
उवाच वचनं देवः सह देवैः पितामहः॥ **7.10.21** ॥

भविष्यत्येवमेतत् ते वचो राक्षसपुङ्गव।
एवमुक्त्वा तु तं राम दशग्रीवं पितामहः॥ **7.10.22** ॥

शृणु चापि वरो भूयः प्रीतस्येह शुभो मम।
हुतानि यानि शीर्षाणि पूर्वमग्नौ त्वयानघ॥ **7.10.23** ॥

पुनस्तानि भविष्यन्ति तथैव तव राक्षस।
वितरामीह ते सौम्य वरं चान्यं दुरासदम्॥ **7.10.24** ॥

छन्दतस्तव रूपं च मनसा यद् यथेप्सितम्।
एवं पितामहोक्तस्य दशग्रीवस्य रक्षसः॥ **7.10.25** ॥

अग्नौ हुतानि शीर्षाणि पुनस्तान्युत्थितानि वै।
एवमुक्त्वा तु तं राम दशग्रीवं पितामहः॥ **7.10.26** ॥

विभीषणमथोवाच वाक्यं लोकपितामहः।
विभीषण त्वया वत्स धर्मसंहितबुद्धिना॥ **7.10.27** ॥

परितुष्टोऽस्मि धर्मात्मन् वरं वरय सुव्रत।
विभीषणस्तु धर्मात्मा वचनं प्राह साञ्जलिः॥ **7.10.28** ॥

वृतः सर्वगुणैर्नित्यं चन्द्रमा रश्मिभिर्यथा।
भगवन् कृतकृत्योऽहं यन्मे लोकगुरुः स्वयम्॥ **7.10.29** ॥

प्रीतेन यदि दातव्यो वरो मे शृणु सुव्रत।
परमापद्गतस्यापि धर्मे मम मतिर्भवेत्॥ **7.10.30** ॥

अशिक्षितं च ब्रह्मास्त्रं भगवन् प्रतिभातु मे।
या या मे जायते बुद्धिर्येषु येष्वाश्रमेषु च॥ **7.10.31** ॥

सा सा भवतु धर्मिष्ठा तं तं धर्मं च पालये।
एष मे परमोदारो वरः परमको मतः॥ **7.10.32** ॥

नहि धर्माभिरक्तानां लोके किञ्चन दुर्लभम्।
पुनः प्रजापतिः प्रीतो विभीषणमुवाच ह॥ **7.10.33** ॥

धर्मिष्ठस्त्वं यथा वत्स तथा चैतद् भविष्यति।
यस्माद् राक्षसयोनौ ते जातस्यामित्रनाशन॥ **7.10.34** ॥

नाधर्मे जायते बुद्धिरमरत्वं ददामि ते।
इत्युक्त्वा कुम्भकर्णाय वरं दातुमवस्थितम्॥ **7.10.35** ॥

प्रजापतिं सुराः सर्वे वाक्यं प्राञ्जलयोऽब्रुवन्।
न तावत् कुम्भकर्णाय प्रदातव्यो वरस्त्वया॥ **7.10.36** ॥

जानीषे हि यथा लोकांस्त्रासयत्येष दुर्मतिः।
नन्दनेऽप्सरसः सप्त महेन्द्रानुचरा दश॥ **7.10.37** ॥

अनेन भक्षिता ब्रह्मन्नृषयो मानुषास्तथा।
अलब्धवरपूर्वेण यत् कृतं राक्षसेन तु॥ **7.10.38** ॥

यद्येष वरलब्धः स्याद् भक्षयेद् भुवनत्रयम्।
वरव्याजेन मोहोऽस्मै दीयताममितप्रभ॥ **7.10.39** ॥

लोकानां स्वस्ति चैवं स्याद् भवेदस्य च सम्मतिः।
एवमुक्तः सुरैर्ब्रह्माचिन्तयत् पद्मसम्भवः॥ **7.10.40** ॥

चिन्तिता चोपतस्थेऽस्य पार्श्वं देवी सरस्वती।
प्राञ्जलिः सा तु पार्श्वस्था प्राह वाक्यं सरस्वती ॥ **7.10.41** ॥

इयमस्म्यागता देव किं कार्यं करवाण्यहम्।
प्रजापतिस्तु तां प्राप्तां प्राह वाक्यं सरस्वतीम् ॥ **7.10.42** ॥

वाणि त्वं राक्षसेन्द्रस्य भव वाग्देवतेप्सिता।
तथेत्युक्त्वा प्रविष्टा सा प्रजापतिरथाब्रवीत् ॥ **7.10.43** ॥

कुम्भकर्ण महाबाहो वरं वरय यो मतः।
कुम्भकर्णस्तु तद्वाक्यं श्रुत्वा वचनमब्रवीत् ॥ **7.10.44** ॥

स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितम्।
एवमस्त्विति तं चोक्त्वा प्रायाद् ब्रह्मा सुरैः समम् ॥ **7.10.45** ॥

देवी सरस्वती चैव राक्षसं तं जहौ पुनः।
ब्रह्मणा सह देवेषु गतेषु च नभःस्थलम् ॥ **7.10.46** ॥

विमुक्तोऽसौ सरस्वत्या स्वां संज्ञां च ततो गतः।
कुम्भकर्णस्तु दुष्टात्मा चिन्तयामास दुःखितः ॥ **7.10.47** ॥

ईदृशं किमिदं वाक्यं ममाद्य वदनाच्च्युतम्।
अहं व्यामोहितो देवैरिति मन्ये तदागतैः ॥ **7.10.48** ॥

एवं लब्धवराः सर्वे भ्रातरो दीप्ततेजसः।
श्लेष्मातकवनं गत्वा तत्र ते न्यवसन् सुखम् ॥ **7.10.49** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे दशमः सर्गः ॥